# ॥ ततानिकेयम् ॥

## ॥ अथ ततानिकाखातनिर्गमो नाम द्वितीयः सर्गः ॥

Version 2.0

ततानिकायाः सोपानमवरुह्य पदं पदम्।
अनेकनिष्कसम्पूर्णां बाहुमूले च सञ्चिकाम्॥ १॥
(बहुडालरसम्पूर्णां बाहुमूले च सञ्चिकाम्) ॥
प्रगृह्य सुधासौधं भानुरश्मिविकासितम्।
(प्रगृह्य सुधासौधं भानुरश्मिविलेपितम्) ।
रक्तवर्णसुधाबद्धरमणीयत्वगावृतम्॥ २॥

नरवाहवणिग्वस्तुशुल्कग्रहणमन्दिरम्।
राजनीतिप्रजारक्षजनताकौशलालयम्। ३॥
श्लक्ष्णपङ्क्तिप्रविष्टब्धनिस्तुरङ्गरथोत्करम्।
चतुस्सिंहध्वजस्तम्बराट्पताकाभिमण्डितम्॥ ४॥
राजलक्ष्मीसमुल्लासं प्रगल्भेन प्रघोषकम्।
नियोगी राजरो नाम शुल्कगृहमवैक्षत॥ ५॥

नियोगी राजरो नाम ततानिकायाः सोपानं पदं पदं अवरुह्य, बाहुमूले अनेक-निष्क-सम्पूर्णां (बहु-डालर-सम्पूर्णां) सञ्चिकाम् प्रगृह्य, सुधा-सौधं भानु-रश्मि-विकासितं (भानु-रश्मि-विलेपितम्) रक्त-वर्ण-सुधा-बद्ध-रमणीय-त्वग्-आवृतं नर-वाह-वणिग्-वस्तु-शुल्क-ग्रहण-मन्दिरं राज-नीति-प्रजा-रक्ष-जनता-कौशल + आलयं श्लक्ष्ण-पङ्क्ति-प्रविष्टब्ध-निस्तुरङ्ग-रथ + उत्करं चतुर् + सिंह-ध्वज-स्तम्ब-राट्-पताक-अभिमण्डितं राज-लक्ष्मी-समुल्लासं प्रगल्भेन प्रघोषकं शुल्कगृहं अवैक्षत।

The employee, named Roger, descended the stairs of the Titanic, step by step, and carried a bag full of money (Dollars) and beheld the customs house, glistening under the (evening) rays of the sun, with beautiful outer walls (skins) were made of red bricks (सुधा = brick); the building that collected duties related to commerce and vehicles, the building that housed police offices, royal judicial courts and people's welfare offices, with big parking lots for lots of horseless vehicles (cars) (निस्तुरङ्गरथ = car) which were parked in neat rows, sporting the four lion pillar and the royal flag, and loudly proclaiming royal opulence.

त्वरमाणः स तातानीं परितः प्रसमैक्षत।
अहःप्रवर्तकार्याणामुक्तवेलासमापनात्॥ ६॥
प्रागेव हि तदागारात् कर्मिणो व्यतिगच्छतः।

कर्मोपरमणात् पश्चान्निर्यास्यत्कर्मभिः सह॥ ७॥
योषितो रमणार्थाय प्रपुल्लाक्षाः प्रतीक्षणीः।

सः त्वरमाणः तातानीं परितः अहः-प्रवर्त-कार्याणं (अहनि प्रवर्तमानानं कार्यानां) उक्त-वेला-समापनात् प्राक् एव हि तदागारात् कर्मिणो व्यतिगच्छतः, कर्म + उपरमणात् पश्चात् निर्यास्यत्-कर्मभिः सह योषितो रमण-अर्थाय प्रपुल्लाक्षाः प्रतीक्षणीः (प्रतीक्षा आसां अस्तीति प्रतीक्षिण्यः, ताः प्रतीक्षणीः) प्रसमैक्षत।

Rushing forward, he saw, all around the Titanic, some workers leaving that building even before the day work shift had come to an end, and he also saw many young women with wide eyes waiting to sport with workers who were going to come out after their work shift was over.

अवगाह्य जनारण्यकोलाहलजलाशयम्॥ ८॥
जलाशयसुयात्रां तामपेक्षमाणो मुहुर्मुहुः।
देशप्रस्थानपत्राणि शीघ्रं प्राप्य निवर्तितुम्॥ ९॥
कतिचित्कोष्ठमारुह्य ज्ञातकक्षं समाविशत्।

जन-आण्य-कोलाहल-जलाशयं अवगाह्य जलाशय-सुयात्रां तां मुहुः मुहुः अपेक्षमाणः देश-प्रस्थान-पत्राणि शीघ्रं प्राप्य निवर्तितुं कतिचित्-कोष्ठं आरुह्य ज्ञात-कक्षं समाविशत्।

Wading through the ocean of a tumultuous crowd, looking forward to the ocean cruise, desirous of quickly obtaining the necessary departure papers and getting back to the ship, he climbed a few stairs and entered a room that he knew quite well.

पीटरं द्रष्टुकामोऽयं प्रस्थपत्राधिकारिणम्॥ १०॥
अपश्यत् तामसं पीठे विद्युच्चामरवीजिते॥
पीटरः स्वगृहं यातो शीघ्रमेवेति दुःखितः। ११॥

अयं प्रस्थपत्राधिकारिणं पीटरं द्रष्टुकामः, विद्युत्+चामर-वीजिते पीठे तामसं अपश्यत्। पीटरः शीघ्रं एव स्वगृहं यातः इति दुःखितः।

Hoping to see Peter, the officer in charge of departure papers, he saw instead, Thomas sitting at that seat under an electric fan. Roger felt unhappy noting that Peter had left early to go home.

वाचकेषत्प्रतीक्षस्व मुहूर्तेनैवावगच्छसि।
कारणमस्य खेदस्य देशावस्थां च सांप्रतम्॥ १२॥

वाचक! ईषत् प्रतीक्षस्व, मुहूर्तेन एव अस्य खेदस्य कारणं, सांप्रतं देशावस्थां च अवगच्छसि।

Oh Reader! Please wait a short while and you will get to know the reason for the unhappiness of Roger and about the conditions that prevail in the land at this time.

तामसास्यं समालोक्य निजाहर्षं निगूह्य च।
स्मयमानमुखो भूत्वा राजरो वक्तुमारभे॥ १३॥

तामस+आस्यं समालोक्य, निज-अहर्षं निगूह्य च, स्मयमान-मुखो भूत्वा राजरो वक्तुं आरभे।

Looking at the face of Thomas, Roger hid his unhappiness, put on a smiling face and began to speak to him:

प्रिय तामस ते स्वस्ति कर्मभारो महांस्तव।
सज्जीकृतानि पत्राणि प्रस्थानार्थं त्वया नु किम्॥ १४॥
तदर्थमुक्तमूल्यं च तस्योपरि च तोषिकं।
पूर्वमेवात्र तौ दत्तौ कैश्चिन्नौकानियोगिभिः॥ १५॥

प्रिय तामस ते स्वस्ति, कर्म-भारो महान् तव। किम् नु प्रस्थान-अर्थं पत्राणि त्वया सज्जीकृतानि। तद्-अर्थं उक्त-मूल्यं च तस्य+उपरि च तोषिकं, पूर्वं एव अत्र तौ दत्तौ कैश्चित् नौका-नियोगिभिः।

“My dear Thomas! Greetings to you. Your work load is excessive. Have you prepared the departure papers (for the Titanic)? Both the prescribed fees for those papers and some extra gratuity were already paid earlier by some ship employees.”

अश्रुतवानिवालीकः कर्मव्यस्त इवाचरन्।
कञ्चित् कालं व्ययीकृत्वा राजरं तामसोऽब्रवीत्॥ १६॥
बन्धो राजर भद्रंस्ते कार्यव्यस्त इहाभवम्॥
त्वदागमो मयाऽदृष्टः पत्राण्येव प्रतीक्षसे॥ १७॥
सम्यगेव नु जानामि त्वद्दर्शो मम मोददः।
विचिनोमि च पत्राणि नात्र सन्तीति तर्कये॥ १८॥

अश्रुतवान् इव, अलीकः, कर्म-व्यस्त इव आचरन्, कञ्चित् कालं व्ययी-कृत्वा राजरं तामसः अब्रवीत्। बन्धो राजर भद्रं ते, कार्य-व्यस्तः इह अभवम्। त्वद्-आगमो मया अदृष्टः। पत्राणि एव प्रतीक्षसे (इति) सम्यक् एव नु जानामि, त्वद्-दर्शो मम मोददः। विचिनोमि च पत्राणि, न अत्र सन्ति इति तर्कये।

Thomas, the deceitful, acting as if he did not hear, continued to behave as if he was busy with his work. After spending some time (like this), he spoke to Roger “Oh my friend Roger! Greetings to you. I was busy with work. I did not see your coming. I know well that you are looking for those papers and your arrival gives me pleasure. I am searching for your papers, and I guess that they are not here.”

राजरस्तद्वचः श्रुत्वा गूढमर्थं विबुध्य च।
क्रोधस्य व्यर्थतां ज्ञात्वा नवयुक्तेः प्रयोजने॥ १९॥
सहसा चालयमास बुद्धिं कार्यविदां वरः।
उवाच च मधुस्यन्दिवाचं तामसप्रीतिदाम्॥ २०॥

राजरः तद्-वचः श्रुत्वा, गूढं अर्थं विबुध्य च, क्रोधस्य व्यर्थतां ज्ञात्वा, (सः) कार्यविदां वरः, नवयुक्तेः प्रयोजने सहसा बुद्धिं चालयमास। मधु-स्यन्दि-वाचं तामस-प्रीतिदाम् उवाच च।

Hearing these words and well understanding their hidden meaning, and knowing the futility of anger at this point, Roger, the well versed in the ways of getting things done, immediately applied his brain to chalk out a new plan of action. With words oozing with honey, which were pleasing to Thomas, be began to speak thus:

विस्मृतं तोषिकं नूनं मयैतत् तामस प्रिय।
पेटिकेऽस्मिन्नधोभागे निलीनं तद्विदृश्यते॥ २१॥

प्रिय तामस, मया एतत् तोषिकं विस्मृतं नूनं, अस्मिन् पेटिके, अधोभागे, तत् निलीनं विदृश्यते।

“Dear Thomas, indeed, I forgot this gift meant for you, it has been lying at the bottom of this bag.”

राजरस्य रजोभावं तामसस्य तमोगुणम्। द्रष्टुं श्रोतुमिवानिच्छन्नस्तं यातो तमोनुदः।
अधिकारिनियोगिभ्यां यातायातं च भाषणम्॥ २२॥

राजरस्य रजो-भावं तामसस्य तमो-गुणं, अधिकारि-नियोगिभ्यां यात+आयातं च भाषणं द्रष्टुं श्रोतुं इव अनिच्छन् अस्तं यातो तमोनुदः।

And the sun, the dispeller of darkness, as if he did not want (or could not bear) to hear the goings on and the conversation between the ship-employee and the government-officer, and as if he did not want (or could not bear) to see the *rajas* quality of Roger and the *tamas* quality of Thomas, descended below the horizon. (Note the choice of the word तमोनुदः for the Sun.)

राजरस्य वचश्श्रुत्वा तामसस्यास्यपङ्कजः॥ २३॥ अस्तंगतेऽपि चण्डांशौ पुफुल्ल मदपङ्कजः।

राजरस्य वचः श्रुत्वा, तामसस्य आस्यपङ्कजः मुखांबुजम् अस्तंगतेऽपि चण्डांशौ, पुफुल्ल।

Hearing the words of Roger, the lotus of Thomas's face, which was born of the dirt of arrogance, blossomed even though the sun had already set. *There is a slight pun in the use of the word* पङ्कज *here.*

ततानिकाप्रस्थपत्राण्याविर्भूतानि तत्क्षणम्॥ २४॥ ईषदेव हसन् वाचं तामसस्तं तदाऽब्रवीत्॥ २५।
माययेव करे तस्य तामसस्याधिकारिणः। आयानां मद्गृहीतानां भागो विद्ध्यस्ति मन्त्रिणः।

माययेव तस्य तामसस्य अधिकारिणः करे तत्क्षणं ततानिका-प्रस्थ-पत्राणि आविर्भूतानि। ईषदेव हसन् वाचं तामसः तं तदा अब्रवीत्। आयानां मद्गृहीतानां मन्त्रिणः भागः अस्त् इति विद्धि।

As if by magic, the departure papers for the Titanic appeared immediately in the hands of the officer Thomas. Grinning a little, Thomas said to him "You should know that there is a share for the minister from all the intake that I make (in this fashion)."

अतः परं किमालापं निश्चित्यैवं सवेगतः॥ २६॥ नवक्लेशसमापन्नः कक्षमन्यं समाविशत्।
हस्तेऽवलम्ब्य पत्राणि तस्मात् कक्षाद्विनिर्गतः। यत्राऽऽस्ते जनसङ्घेन टोनिः परिवृतस्तदा॥ २८॥
अन्याधिकारिसाहाय्यं प्रलब्धुं राजरस्तदा॥ २७।

तदा राजरः, नव-क्लेश-समापन्नः, अतः परं किं आलापं एवं निश्चित्य, पत्राणि हस्ते अवलम्ब्य, अन्य-अधिकारि-साहाय्यं प्रलब्धुं तस्मात् कक्षात् सवेगतः विनिर्गतः। अन्यं कक्षं समाविशत्, यत्र आस्ते जन-सङ्घेन टोनिः परिवृतः तदा।

Then Roger, facing a new problem, thinking "what more is there to talk at this place?", grabbing the departure papers, qucikly left that room to get the help of another officer. Now

with a new problem plaguing his mind, he entered another room, where Toni was surrounded by a crowd of people.

प्रियवाचक तातान्या महाब्धिप्लवनोत्सवः।
नूनं सिद्ध इति ध्यायेस्तर्हि किं त्वां ब्रवीम्यहम्॥ २९॥

प्रिय-वाचक तातान्याः महाब्धि-प्लवन+उत्सवः नूनं सिद्धः इति ध्यायेः तर्हि किं त्वां ब्रवीमि अहम्।

Dear Reader! if you were thinking that festivities of the ocean voyage of the Titanic are now at hand, then what can I say about you?

ततानिकानिभा नौका खातात् स्वबलनिर्गमे।
असमर्थेति सुविज्ञातं तरणीखातपण्डितैः॥ ३०॥

ततानीनिभनौकानां प्रवृद्धदेहभारीणाम्।
इतराभ्योऽल्पनौकाभ्यो घटनाद्भविता भयः॥ ३१॥

ततानिका-निभा नौका खातात् स्व-बल-निर्गमे असमर्था इति सुविज्ञातं तरणी-खात-पण्डितैः ततानी-निभ-नौकानां प्रवृद्ध-देह-भारीणां घटनात् इतराभ्यः अल्पनौकाभ्यः भयः भविता।

It is well known to (खात = harbor) experts on ships and harbors that ships like the Titanic are incapable of leaving a harbor by their own power. There is the fearsome possibility of other small boats of being hit by ocean liners like the Titanic with their huge bodies.

जानंस्ततानिनौकार्थमुपनौकोपयोजनम्।
अत्यावश्यमतः टोनिं भाषञ्चक्रेऽथ राजरः॥ ३२॥

टोने टोने महाभाग सहायतरणीमिह।
ततानिकाप्रकर्षार्थं शीघ्रं प्रेषय प्रेषय॥ ३३॥

जानन् ततानि-नौका-अर्थं उप-नौक+उप-योजनं अत्यावश्यं अतः टोनिं भाषञ्चक्रे अथ राजरः।
टोने टोने महाभाग सहायतरणीं इह ततानिका-प्रकर्षार्थं शीघ्रं प्रेषय प्रेषय।

Knowing that it was absolutely necessary to get the help of a tug boat (उप-नौका = tug boat) for the Titanic, Roger began to talk to Toni: "Oh Toni! Toni! my dear friend! Please quickly dispatch a tug boat (सहय-तरणी = helping boat, tug boat) to pull the Titanic (out of the harbor)."

टोनिस्तु राजरं वीक्ष्य प्रत्युवाच विषाददा।
दातव्यैव मया वार्ता गतोऽस्तं च नभोमणिः॥ ३४॥
ध्वान्तं व्याप्तं हि सर्वत्र गगनेऽब्धौ च भूतले।
धर्मपथविरोधेन कथं मार्गेण याम्यहम् ॥ ३५॥

एवंविधायां वेलायामुपनौकोपयोजनम्।
खण्डितं राजशास्त्रेषु तस्मात् प्रसीद राजर॥ ३६॥
श्वः प्रभातवेलायां तवेच्छां पूरयाम्यहम्।

टोनिः तु राजरं वीक्ष्य प्रत्युवाच विषाददा वार्ता मया दातव्या एव, नभो-मणिः अस्तं गतः च। ध्वान्तं व्याप्तं हि सर्वत्र गगनेऽब्धौ च भूतले। धर्म-पथ-विरोधेन मार्गेण कथं अहं यामि। एवं-विधायां वेलायां उप-नौक+उपयोजनं खण्डितं राज-शास्त्रेषु तस्मात् प्रसीद राजर। श्वः प्रभात-वेलायां तव इच्छां अहं पूरयामि।

Toni looked up at Roger and replied “I have to give you some sad news. The sun has set and darkness has descended everywhere - in the sky, on the ocean and on the land. How can I go on a illegal path? When it is like this (dark) it is forbidden by law to employ tug boats. So, Roger, just wait a while. I will fulfill your desire tomorrow morning.”

राजरो वचनं श्रुत्वा क्लेशं निगृह्य चात्मनि॥ ३७॥
एतद्विधानां विघ्नानामनेकानां विनाशने।
समर्थोऽहमिति दृप्यन् मार्गमाणश्च तोषिकम्॥ ३८॥
प्रसन्नमुखभावेन स्मयन् टोनिमभाषत।
सखे टोने प्रसीद त्वं न हि त्वम् विस्मृतो मया॥ ३९॥
पेटिकेऽस्मिन्नधोभागे देयं तेऽस्तीह तोषिकम्।
स्वीकृत्येदं विना क्षेपमनुग्राह्या वयं त्वया॥ ४०॥

राजरः वचनं श्रुत्वा, क्लेशं निगृह्य च आत्मनि, एतद्विधानां विघ्नानां अनेकानां विनाशने समर्थः अहं इति दृप्यन् मार्गमाणः च तोषिकम् प्रसन्न-मुख-भावेन स्मयन् टोनिं अभाषत। सखे टोने प्रसीद त्वं। न हि त्वं विस्मृतो मया। पेटिके अस्मिन् अधो-भागे देयं ते अस्ति इह तोषिकम्। स्वीकृत्य इदं विना क्षेपं अनुग्राह्या वयं त्वया।

Roger, hearing these words, and hiding his unhappiness within himself, taking pride in the fact that he was capable of overcoming many such obsctacles, put on a pleasing face, smiled and spoke to Toni “My friend Toni! I implore you. You have not been forgotten by me. At the bottom of this bag there is a gift I want to give you. Please accept it and without delay oblige us.

तत्रस्थजनसङ्घानां पश्यतामपि शृण्वताम्।
धर्मवाचमनादृत्य धूर्तलोकविकत्थनम्॥ ४१॥
एवंविधं विना लज्जां प्रत्यगेव प्रभाषकम्।
राजरं वीक्ष्य धर्मात्मा टोनिः परुषमब्रवीत्॥ ४२॥
चरन्तु मानुषा लोके पथं धर्मविरोधकम्।
वदन्तु प्रियवाक्यानि दास्यन्तु तोषिकाण्यपि॥ ४३॥
नाऽहं शास्त्रविरोधेषु मनाङ्मार्गेषु वर्तये।
तस्माद्यातु भवानस्मात् स्थानाच्च श्वोऽऽगमिष्यतु॥ ४४॥
इतः परं भवान् वाच्यो न मया कर्मचारिणा।

तत्र-स्थ-जन-सङ्घानां पश्यतां शृण्वताम् अपि, धर्म-वाचं अन-आदृत्य धूर्त-लोक-विकत्थनं एवंविधं लज्जां विना प्रत्यक् एव प्रभाषकं राजरं वीक्ष्य धर्मात्मा टोनिः परुषं अब्रवीत्। चरन्तु मानुषाः लोके पथं धर्मविरोधकं, वदन्तु प्रियवाक्यानि, दास्यन्तु तोषिकाणि अपि, अहं शास्त्र-विरोधेषु मार्गेषु न मनाक् वर्तये। तस्मात् यातु भवान् अस्मात् स्थानात् च श्वः आगमिष्यतु। इतः परं भवान् न वाच्यो मया कर्मचारिणा।

Seeing Roger, who spoke such words which were against all norms of justice and were the words of a villain, even though crowds of people assembled there were seeing and listening, the honest Toni said these harsh words “Let hordes of people go in illegal ways, let them speak sweet words, let them even give gifts, I will never tread the paths of illegality and adharma. Therefore, Sir, you may please leave this place and come back tomorrow. Sir, beyond this, you should not be spoken to any more by me, a mere officer. (Toni started to address Roger as भवान् in his anger and disgust.)

तामसादितमोव्योम्नि टोनितुल्यसुतारकः॥ ४५॥
अन्धकारपरिव्याप्तनिशि रेजे भराडिव।
आधुनिककरालेषु दिवसेषु सुकर्मभिः॥ ४६॥
केवलं टोनितुल्यानां धर्मचक्रः प्रवर्तते।

तामस-आदि-तमः + व्योम्नि टोनि-तुल्य-सु-तारकः अन्धकार-परिव्याप्त-निशि रेजे भराट् (भाणां रात् = चन्द्रः ; भं = star) इव। आधुनिक-करालेषु दिवसेषु टोनितुल्यानां सुकर्मभिः केवलं धर्म-चक्रः प्रवर्तते।

In the darkness filled sky of Thomas and others, the shining star of Toni and his like, shone like the Moon, the Lord of the stars, in a dark night sky. During these terrible times, the wheel of justice prevails solely because of the good acts of people like Toni.

कार्यसिद्धिर्न जातेति व्यक्तभावेन बोधितः॥ ४७॥
प्रतिन्यवर्तत तातानिं विषण्णास्यश्च राजरः।
तातानिकमहानौकाखातनिर्गमदर्शनम्॥ ४८॥
अपेक्षां कुर्वतां नृणां भृशं दुःखमभूत्तदा।
ततोऽपि च महद्दुःखं ततानिस्वामिनामभुत्॥ ४९॥
एकरात्रिविलम्बेन जातस्तेषां महाव्ययः।
ततानिकाया यात्रीणां प्राभवत्सुकौतुकम्॥ ५०॥
पानशालां गताः केचिन्नर्तनार्थं तथाऽपरे।
चित्रशालां गताः केचिद्भोजनार्थं तथाऽपरे॥ ५१॥
द्यूतशालां गताः केचित् स्नवनार्थं तथाऽपरे।
क्रीडाशालां गताः केचिद् धूमपानाय चापरे॥ ५२॥
उपरिष्टानि गताः केचिद् द्रष्टुं पट्टनवैभवम्।
दैवीकमनसः केचित् सन्ध्योपासं च चक्रिरे॥ ५३॥
निजकक्षान् गताः केचित् दूरदर्शदिदृक्षया।
स्रस्तरेषु समासीनाः सरस्सु वार्गजा यथा॥ ५४॥
केचित्तत्र श्रमक्लान्ता ययुः कक्षान् स्वपाय च।
एतेषामपि सर्वेषां यथोचितसुखप्रदम्॥ ५५॥
महाराज्ञीव तातानी सदातिथ्यं व्यतारयत्।

कार्य-सिद्धिः न जाता इति व्यक्त-भावेन बोधितः राजरः प्रतिन्यवर्तत तातानिं विषण्णास्यः च। तातानिक-महानौका-खात-निर्गम-दर्शनं अपेक्षां कुर्वतां नृणां भृशं दुःखं अभूत् तदा। ततः अपि च महादुःखं ततानि-स्वामिनां अभुत्। एक-रात्रि-विलम्बेन जातः तेषां महाव्ययः। ततानिकाया यात्रीणां प्राभवत् सुकौतुकम्। पान-शालां गताः केचित् नर्तनार्थं तथा अपरे। चित्र-शालां गताः केचित् भोजनार्थं तथा अपरे। द्यूत-शालां गताः केचित् स्नवन-आर्थं तथा अपरे। क्रीडा-शालां गताः केचित् धूम-पानाय च अपरे। उपरिष्टानि गताः केचित् द्रष्टुं पट्टनवैभवम्। दैवीक-मनसः केचित् सन्ध्य + उपासं च चक्रिरे। निज-कक्षान् गताः केचित् दूर-दर्श-दिदृक्षया, स्रस्तरेषु समासीनाः सरस्सु वार्-गजा यथा। केचित् च तत्र श्रम-क्लान्ताः स्वपाय (निज) कक्षान् ययुः । एतेषां अपि सर्वेषां यथा + उचित-सुख-प्रदं सद्-आतिथ्यं महाराज्ञी इव तातानी व्यतारयत्।

After being publicly admonished thus and knowing that his attempt was not successful, Roger returned to the Titanic with a saddened face. The people who had waited to see the departure of the great steam ship Titanic were saddened greatly. Even greater was the sadness of the owners of the Titanic - by the delay of just one night in the departure of the Titanic they lost huge amounts of money. However, the passengers of the Titanic were overjoyed (they got an extra night on the luxurious Titanic). Some took off to drinking parlors, some went to the dance halls, some went to cinemas, some went to banquet halls, some went to gambling halls, some went for swimming, some went to play sports, some went off to smoke, some went to the upper decks to get a good look at the city (night) skyline, some others with godly pursuits went to perform their Sandhya rites, some others retired to

their rooms to watch TV and lounged on sofas (स्रस्तर = sofa) like hippopotomuses in a lake (were like couch potatoes) (वार्+गज = water elephant = hippopotamus), others were tired and went to their rooms to sleep. The Titanic treated each and every one of them as an honored guest with all comforts, like a maharani would.

कतिष्वपि मुहूर्तेषु व्यतीतेषु नभश्रिया॥ ५६॥
तारागणज्वलद्वस्त्रमपास्य वसनान्तरम्।
ईषद्रक्तसुवर्णाढ्यमुषत्कालविसंसृतम्॥ ५७॥
धृतं बुधसुरत्नाढ्यं सूर्यस्वागमकाङ्क्षया।
गतेषु कतिमुहूर्तेषु प्राचीन उदिते रवौ॥ ५८॥
ततो विहाय वस्त्रं तत्तया लोलमनस्कया।
वसनेतरं धृतं भूयः शुभ्रनीलमनोहरम्॥ ५९॥

कतिषु अपि मुहूर्तेषु व्यतीतेषु, नभ-श्रिया तारा-गण-ज्वलद्-वस्त्रं अपास्य, सूर्य-स्वागम-काङ्क्षया वसनान्तरम् ईषद्-रक्त-सुवर्ण-आढ्यं उषत्-काल-विसंसृतं बुध-सुरत्न-आढ्यं धृतं। गतेषु कति-मुहूर्तेषु प्राचीने उदिते रवौ, ततो विहाय वस्त्रं तत्, तया लोल-मनस्कया भूयः वसन+इतरं शुभ्रनीलमनोहरम् धृतं।

After a few hours, the sky maiden removed her sari studded with sparkling star clusters and put on another of a light reddish color, studded with the diamond of the shining Mercury, and spread out for her by the morning twilight, as if to welcome the rising sun. Later, this fickle minded maiden discarded that sari also and put on yet another sari of a pleasing clear blue color.

रात्रिवेलाश्रमक्लान्ताः स्वापहीना च कर्मिणः।
स्वस्थानानन्यकर्मिभ्यो त्यक्त्वा शेतुं विनिर्गताः॥ ६०॥
टोनिर्निर्गमनात्पूर्वं स्वस्थानाच्च यथाविधिम्।
आचरन् कर्म धर्मिष्ठं राजरमनपेक्ष्य च॥ ६१॥
ततानिकाप्रकर्षार्थमुपनौकोपजोजनम्।
पर्यकल्प्यत संभारं सर्वयात्रिसुखप्रदम्॥ ६२॥

रात्रि-वेला-श्रम-क्लान्ताः स्वाप-हीना च कर्मिणः स्व-स्थानानि अन्य-कर्मिभ्यो त्यक्त्वा शेतुं विनिर्गताः। टोनिः च स्वस्थानत् निर्गमनात् पूर्वं एव, यथाविधिं कर्म धर्मिष्ठं आचरन्, राजरं अनपेक्ष्य च, ततानिका-प्रकर्षार्थं उप-नौका+उपजोजनं सर्वयात्रिसुखप्रदम् संभारं पर्यकल्प्यत।

The workers (on the Titanic) lacking sleep and tired from their night shift work, gave up their seats to other workers (from the next shift) and went to sleep. Before leaving his seat and without even waiting for Roger, Toni performing his duties straightforwardly as per rules, made all the arrangements for a tug boat to pull the Titanic; all of which were very pleasing to its passengers.

उपनौकाऽपि भं भं भमिति ध्मात्वा ततानिकाम्।
कर्षयन्त्यल्पवेगेन खातस्थविषमान् बहून्॥ ६३॥
वर्जयित्वा विना स्पर्शं प्लवञ्चक्रे सलाघवम्।
पतिमेवानुपश्यन्ती वीथिस्थविषमान् विटान्॥ ६४॥
वर्जयित्वा विना स्पर्शं प्लवं कुर्यात् यथा सती।

उप-नौका अपि भं भं भं इति ध्मात्वा, ततानिकां अल्प-वेगेन कर्षयन्ति, बहून् खात-स्थ-विषमान् वर्जयित्वा विना स्पर्शं प्लवं चक्रे सलाघवं, पतिं एव अनुपश्यन्ती वीथि-स्थ-विषमान् विटान् वर्जयित्वा विना स्पर्शं प्लवं कुर्यात् यथा सती।

The tug boat, made (loud) sounds "bham bham bham" (with its horn), and began to pull the Titanic slowly; it skillfully cruised forwards avoiding the many obstacles in the harbor without making contact with any of them like a chaste woman, with only her husband in her mind, skillfully negotiates down a street avoiding the many street villains without making physical contact with them.

बाष्पीययन्त्रनालेभ्यो हर्षयुक्ता ततानिका॥ ६५॥
विश्वसन्ती चकाराथ भूं भूमिति महास्वनम्।
रणारंभे यथा वीरो धमेच्छङ्कं महास्वनम्॥ ६६॥

बाष्पीय-यन्त्र-नालेभ्यो हर्ष-युक्ता ततानिका विश्वसन्ती चकार अथ भूं भूं इति महास्वनं, रण-आरंभे यथा वीरो धमेत् शङ्कं महास्वनम्।

The happy Titanic also, made loud sounds "bhuum bhuum" by the release of steam from its steam whistles like a warrior sounding on his conch at the commencement of battle.

राजमाणे च बालार्के शयनोत्थितयात्रिकाः।
द्रष्टुकामाः समापन्ना नौकायाः खातनिर्गमम्॥ ६७॥
वाति वाते शुखस्पर्शे शीतले हिमशीकरे।
ताताानिः पुप्लुवे तत्र स्वयन्त्राणां बलाद्विना॥ ६८॥

राजमाणे च बाल-अर्के शयन+उत्थित-यात्रिकाः नौकायाः खात-निर्गमं द्रष्टुकामाः समापन्नाः। वाति वाते शुख-स्पर्शे शीतले हिमशीकरे, ताताानिः पुप्लुवे तत्र स्व-यन्त्राणां बलाद् विना।

Under the early morning sun, many passengers, who had gotten out of their beds, came out to see the the Titanic move out of the harbor. Even as the cold and pleasant wind filled with the morning mist was blowing, the Titanic started to move out without the use of her engines.

प्रशान्तसमये तस्मिन् रमणीये यदृच्छया।
प्रवृद्धाः शीकरा सान्द्राः सहसा हिमशीतलाः॥ ६९॥
आच्छादयन् दृशो यात्रिवर्गस्य च नियोगिनाम्।
उपतर्याश्च ततान्याश्चालकानां समानतः॥ ७०॥
पुरुषाणां दृशः क्रोधमात्सर्यादिगुणा इव।

रमणीये प्रशान्त-समये तस्मिन्, यदृच्छया सान्द्राः हिमशीतलाः शीकरा सहसा प्रवृद्धाः आच्छादयन् दृशो यात्रि-वर्गस्य च उपतर्याः च ततान्याः नियोगिनां चालकानां समानतः, पुरुषाणां दृशः क्रोध-मात्सर्य-अदि-गुणा इव।

At that idyllic calm time, by chance, all of a sudden, a thick cold fog enveloped (the harbor) and equally clouded the vision of the passengers, the workers and pilots on both the tug boat and the Titanic, much like the qualities of anger, jealousy, etc. would cloud the

vision of people.

ततानिं भूधराकारां प्रसमीक्ष्य भयानकाम्॥ ७१॥
खातस्थेतरनौकास्तु दीनस्वरेण सस्वनुः।
उपनौका स्वरैर्दीनैस्तैस्तैर्मार्गे निरूपिते॥ ७२॥
कष्टेन कर्षणं चक्रे शीकरातुरवीक्षणा।

ततानिं भूधर-आकारां प्रसमीक्ष्य भयानकां खात-स्थ+इतर-नौकाः तु दीन-स्वरेण सस्वनुः। उपनौका शीकर-आतुर-वीक्षणा स्वरैः दीनैः तैः तैः निरूपिते मार्गे कष्टेन कर्षणं चक्रे।

The other boats in the harbor, seeing the fearful and mountain sized Titanic, cried out with shrill voices. The tug boat, whose vision was made difficult by the the fog, pulled forward with difficulty along a path it guessed from the sounds of the shrill cries of the other boats.

बालार्ककिरणैरर्के खातदेशप्रकाशने॥ ७३॥
असमर्थे च ततानी नौकां नवार्कनामिनीम्।
अघटयत्पार्श्वभागेन दुर्वशात् खातमध्यगाम्॥ ७४॥

बाल-अर्क-किरणैः अर्के खात-देश-प्रकाशने असमर्थे च ततानी नौकां नवार्कनामिनीं खातमध्यगाम् दुर्वशात् पार्श्वभागेन अघटयत्।

Even as the sun with its tender rays was not able to brighten the harbor area, the Titanic hit with its side a boat called the *New York* which unfortnately happened to be in the middle of the harbor.

एतद्दुर्घटनं वीक्ष्य चालकाश्च नियोगिनः।
किमेतेदपरं वारं विधिना परिमर्दनम्॥ ७५॥
इति मत्वा भृशं तप्त्वा नवार्कस्यैव केवलम्।
उत्पाटनमभुद्वीक्ष्य सानामयततानिकाम्॥ ७६॥
अपश्यंस्तामन्यपक्षस्थामयोमयदृढत्वचम्।
नवार्कनष्टनिस्तारः खातरक्षकसान्त्वनम्॥ ७७॥
विना कष्टमुभे शक्ये धनक्षेपेण केवलम्।
प्रतिपादितुमत्रेति तेऽपि धैर्यमधारयन्॥ ७८॥
शीघ्रमेव च संभारान् चक्रिरे ते यथोचितम्।

एतद् दुर्घटनं वीक्ष्य, चालकाः च नियोगिनः "किं एतेत् अपरं वारं विधिना परिमर्दनं" इति मत्वा, भृशं तप्त्वा, नवार्कस्य एव केवलम् उत्पाटनं अभुत् वीक्ष्य, स-अनामय-ततानिकां तां अयोमयदृढत्वचं अन्यपक्षस्थां अपश्यन्। नवार्क-नष्ट-निस्तारः खात-रक्षक-सान्त्वनं उभे विना कष्टम् धन-क्षेपेण केवलं प्रतिपादितुं अत्र शक्ये इति ते अपि धैर्यं अधारयन्। शीघ्रं एव च संभारान् चक्रिरे ते यथा+उचितम्।

The pilots and the workers, seeing this accident thought to themselves "why have we been batterd by fate yet another time?" noticed that only the New York was ripped, and that away from it, the Titanic was hale and hearty with its iron clad exterior. They gathered their courage after noting that the restitution for loss sustained by the New York and the pay-off to the harbour police can all be done with just the spending of some money. They

quickly made all the arrangements to the satisfaction of every one.

केनचिच्चाथ कालेन खातनिस्सर्गहर्षिता॥ ७९ ॥
पीडानेकविनिर्मुक्ता गगनोपमसागरे।
आत्मशक्तिसमुद्भूतस्वच्छन्दगतिगर्विता॥ ८० ॥
चतुर्दिक्षु विना रोधं बभ्राम च ननन्द च।
ततानी भवपाशेभ्यो राजहंसीव मोचिता॥ ८१ ॥

केनचित् च अथ कालेन ततानी खात - निस्सर्ग - हर्षिता पीडा - अनेक - विनिर्मुक्ता गगन + उपम - सागरे आत्म - शक्ति - समुद्भूत - स्वच्छन्द - गति - गर्विता चतुर् - दिक्षु विना रोधं बभ्राम च ननन्द च, भवपाशेभ्यो मोचिता राजहंसी इव।

After some time, the Titanic, released from her sufferings and elated that she had come out of the harbor, proud that she could go freely on her own power, rejoiced and roamed the sea, as big as the sky, in all four directions with out hindrance, like a great soul released from the clutches of samsara (like a king swan that has been released from its rope net).

कथमपि बहुविघ्नानद्रितुल्यान् विशीर्य
प्रबलकुशलयन्त्रैरर्णवं दारयन्ती।
बहुसमयतितीक्षां कुर्वतां यात्रिकाणां
सुखवितरणदक्षा गाहते सा ततानी॥ ८२ ॥

अद्रितुल्यान् बहु - विघ्नान् कथमपि विशीर्य प्रबल - कुशल - यन्त्रैः अर्णवं दारयन्ती, बहु - समय - तितीक्षां कुर्वतां यात्रिकाणां सुख - वितरण - दक्षा गाहते सा ततानी।

Having somehow shattered the mountains of many obstacles that came in the way and quite capable of bestowing pleasures to its passengers who had (patiently) waited for a long time (for this passage), the Titanic began to cruise (on the high seas), ripping the ocean with (the rotor blades of) her strong engines.

॥ इति ततानिकाखातनिगर्मो नाम द्वितीयः सर्गः ॥